# संस्कृतवार्ता:

दिनाङ्क : 21/08/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- अद्य संसदा राज्यसभयायाः अनुमोदनेन सह पञ्चविंशत्यधिक द्विसहस्त्रतमवर्षस्य ऑनलाइन-गेमिंग-प्रचार-विनियमन-विधेयकं पारितम्।
- विदेशमन्त्री डा. एस्. जयशङ्करः रशियादेशस्य विदेशमन्त्री सर्गेय् लावरोव् च मास्को-नगरे मिलित्वा भारत-रशिया-द्विपाक्षिक-सम्बन्धस्य समग्रस्य समीक्षाम् च कृत्वा; आतङ्कवादस्य सर्वविध-प्रकटीकरणानि विरुध्य संयुक्तरूपेण युद्धं कर्तुं उभयपक्षौ संकल्पम् अकुरुताम् ।
- दीपावलि-छठादि उत्सवेषु यात्रिकाणां सौख्यार्थं द्वादश सहस्रतोधिकानि विशेष-रेलयानानि चालयितुं रेल्-मन्त्रालयेन निर्णयः कृतोऽस्ति।
- गुजरातप्रदेशे जलप्रलयसदृशवर्षायाः तीव्रता सत्यपि स्थितिः नियन्त्रणाधीना वर्तते।

---------------------------

ऑनलाइन-गेमिंग-प्रचार-विनियमनम्

अद्य संसदा राज्यसभयायाः अनुमोदनेन सह पञ्चविंशत्यधिक द्विसहस्त्रतमवर्षस्य ऑनलाइन-गेमिंग-प्रचार-विनियमन-विधेयकं पारितम्। अनेन विधेयकेन ई-स्पॉट्र्स इति, ऑनलाइन-सोशल- गेम इत्येतयोः प्रचारेण सह ताभ्यां सम्बद्धाः हानिकारक-ऑनलाईन-धनाधारितक्रीडाः, विज्ञापनानि, वित्तीय-व्यवहाराः च निषिद्धाः भविष्यन्ति।

---------------------------

रूसदेशे विदेशमन्त्री डॉ. एस्. जयशंकरः

अद्य रूसदेशे विदेशमन्त्री डॉ. एस्. जयशंकरः स्वस्य समकक्षेण सर्गेई लावरोवेन सह वार्ताम् अकरोत्। उद्घाटनभाषणे डॉ. जयशङ्करः अवदत् यत्, एषा सभा राजनैतिक-सङ्गति-विषये चर्चां कर्तुं, द्विपक्षीय-सम्बन्धानां समीक्षां कर्तुं च अवसरभूताऽस्ति। स: अवदन् यत् अद्य तयोः सभायाः वैश्विकः प्रसङ्गः उदीयमान-भू-राजनीतिक-स्थितौ, परिवर्तमानम् आर्थिक-व्यापारिक-परिदृश्यम्, अधिकतम-अनुकूलतानां साधनाय उभयोः देशयोः लक्ष्यानि च सन्ति। सः विश्वासं प्रकटितवान् यत् अद्यतनः विचारविनिमयः भारत-रूस-वार्षिक-शिखर-सम्मेलनं यथासम्भवम् परिणामोन्मुखं कर्तुं महत्त्वपूर्णं योगदानं करिष्यतीति।

---------------------------

संसद:स्थगनम्

अद्य लोकसभायाः राज्यसभायाश्च अनिश्चितकालाय स्थगनं जातमस्ति। प्रावृट्-सत्रस्य आरम्भः गतमासस्य एकविंशतिः दिनाङ्के आरब्धासीत्। लोकसभायां यदा अपराह्णे द्वादश-वादने प्रथमसमागमानन्तरं सभा आरब्धा तदा लोकसभाध्यक्षः ओमबिरला: अवदत् यत्, सत्रेऽस्मिन् चतुर्दश सर्वकारीय-विधेयकानि प्रस्तुतानि, आहत्य द्वादश विधेयकानि च अनुमोदितानीति। सः अवदत् यत्, आपरेशनसिन्दूर् इतिविषये द्वे विशेषचर्चेऽपि जाते, समाप्तिश्च प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रत्युत्तरेण अभवत्। लोकसभायां भारतस्य अन्तरिक्षकार्यक्रमस्य उपलब्धीनां विषयेऽपि विशेष-चर्चा आरब्धेति अध्यक्षः सूचितवान्। सः अवदत् यत्, अस्य सत्रस्य कार्यसूच्यां आहत्य नवदशोत्तरचतुश्शतताराङ्कित-प्रश्नाः समाविष्टाः आसन्, परन्तु निरन्तर-पूर्वनियोजित-व्यवधानैः केवलं पञ्चपञ्चाशत् प्रश्नाः एव मौखिक-उत्तरार्थं गृहीताः।

अध्यक्षः अवदत् यत्, अस्मिन् सत्रे यादृशाः भाषाव्यवहारादयः दृष्टाः, संसदः गौरवानुरूपं नासन्नीति। श्री बिरला-वर्यः अधोरेखितवान् यत् संसदीयायाः मर्यादायाः रक्षणाय योगदानं सदस्यानां सामूहिकं दायित्वमस्तीति। राज्यसभायां, अपराह्णे द्विवादने प्रथमस्थगनानन्तरं यदा सभा पुनः सम्मिलिता, तदा विपक्षदलानि एस. आई. आर. इति विषयमवलम्ब्य घोषोच्चारणकर्तुम् आरभन्त। उपसभापतिः हरिवंशः विरोधं कुर्वतः सदस्यान् सभायाः कार्यसम्पादनाय आग्रहम् अकरोत्। कोलाहलमध्ये संविधानस्य त्रिंशत्युत्तरैकशततमं संशोधनम्

विधेयकम्, विंशतिपञ्चविंशतिः इति केन्द्र-शासित-राज्यानां शासनस्य संशोधनात्मक-विधेयकम्, विंशतिपञ्चविंशतिः, जम्मू-कश्मीरस्य पुनर्गठनस्य संशोधनात्मक-विधेयकम्, विंशतिपञ्चविंशतिश्च राज्यसभायाः निरीक्षणार्थं संयुक्त-समितिम् उद्दिश्य प्रेषितानि सन्ति। संसदा आन्लैन-गेमिङ्ग् इत्यस्य प्रचार-विनियमन-विधेयकम्, विंशतिपञ्चविंशतिः अपि स्वीकृतम्, अद्य राज्यसभया च अनुमोदितम्। राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन खर्गे इत्यनेन आरोपः कृतः यत् विपक्षस्य सदस्याः स्वविषयेषु वक्तुं नानुमन्यन्ते इति। संसदीयकार्यमन्त्री किरेन रिजीजू इत्येषश्च तस्य व्याख्यायाः विरोधं कृत्वा उक्तवान् यत् पीठस्योपरि आक्षेपः समीचीनः नास्तीति। सः अवदत् यत्, अध्यक्षः प्रत्येकं सदस्याय वक्तव्यावसरः अयच्छत् परन्तु विपक्षस्य सांसदाः प्रासङ्गिकविषये न उक्तवन्तः इति। सः अवदत् यत्, सम्पूर्णे प्रावृट्सत्रे विपक्षस्य सांसदाः अध्यक्षेण सह सहयोगं न कृतवन्तः इति।

अपराह्णे प्रायः सार्द्धद्विवादने द्वितीय-स्थगनानन्तरं यदा सभा पुनः समारब्धा तदा प्रावृट्-सत्रकाले विपक्षस्य सांसदैः कृत-व्यवधान-विषये उपसभापतिः असन्तोषं प्रकटितवान्। सः अवदत् यत्, सभायां केवलं सपादैकचत्वारिंशत् होराः एव कार्यम् अभवत्, सत्रस्य उत्पादकता च चत्वारिंशत्प्रतिशतादपि न्यूनमासीत्। पश्चात् सः सभां अनिर्दिष्टकालाय स्थगितवान्।

---

**वैष्णवः-विशेष-रेलसेवा**

दीपावलि-छठादि उत्सवेषु यात्रिकाणां सौख्यार्थं द्वादश सहस्रातोधिकानि विशेष-रेलयानानि चालयितुं रेल्-मंत्रालयेन निर्णयः कृतोऽस्ति। अद्य नवदेहल्यां पत्रकारसम्मेलनं सम्बोधयन् रेलमन्त्री अश्विनी वैष्णवः अघोषयत् यत् अक्टोबर्-मासस्य त्रयोदश दिनाङ्कात् षड्विंशतिः दिनाङ्कपर्यन्तं यात्रां कुर्वन्तः, सप्तदश नवेम्बर्-दिनाङ्कातः एक डिसेम्बर्-दिनाङ्कपर्यन्तं च पुनरागमनयात्रां कुर्वन्तः यात्रिकाणां कृते पुनरागमनचिटिकायां विंशतिः प्रतिशतस्य न्यूनव्ययं दातव्यं भविष्यतीति।

---

**प्रधानमन्त्रिणः बिहार-पश्चिमबंगाल भ्रमणम्**

प्रधानमन्त्री नरेन्द्रमोदी श्वः बिहारपश्चिमबङ्गयोः यात्रायां भविष्यति। यात्रावधौ प्रधानमन्त्री गया-नगरे प्रायः त्रयोदश-सहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासं उद्घाटनञ्च करिष्यति। पश्चिमबङ्गस्य प्रवासे श्रीमोदी द्विपञ्चाशत्शत कोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासं उद्घाटनं च करिष्यति। सः कोलकाता-नगरे नवनिर्मित-मेट्रो-रेल्-सेवामपि हरितध्वजप्रदर्शनपूर्वकं समारप्स्यति। यात्राविषये भाषमाणः प्रधानमन्त्री उक्तवान् यत् पश्चिमबङ्गराज्यम् भाजपायाः विकासकार्यसूच्यां प्राथम्येन वर्तते। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत् प्रतिदिनं राज्ये तृणमूलकाङ्ग्रेसदलं विरुध्य जनाक्रोशः निरन्तरं वर्धमानः अस्तीति। प्रधानमन्त्री अवदत् यत् अहं कोलकातानगरे श्रमिकसभामपि करिष्यामीति।

-----------------------------

<u>राजनाथ-शुभांशु</u>

रक्षामंत्री राजनाथसिंहः अद्य नवदेहल्यां ग्रूप्-क्याप्टन् शुभाशु शुक्लेन सह मिलितवान्, श्रीसिङ्घः तस्य उपलब्ध्यै ग्रूप्-क्याप्टन् शुक्लाय अभिनन्दनपूर्वकं वर्धापनानि अयच्छत्।

-----------------------------

<u>युक्रेनरूसौ</u>

युक्रेन-देशस्य वायु-दलेन अद्य प्रकाशितं यत् रशिया-देशेन अस्मिन् वर्षे बृहत्तमं वायु-आक्रमणं कृतम्। रात्रौ चतुर्सप्तत्यधिकपञ्चशत ड्रोनाक्रणम्, चत्वारिंशत् प्रक्षेपास्त्राणि च यूक्रेनदेशस्योपरि प्रक्षिप्ताः। एतेषु आक्रमणेषु अधिकतया देशस्य पश्चिम-प्रदेशाः लक्ष्यीकृताः। अधिकारिणां मतानुसारं, आक्रमणेषु न्यूनातिन्यूनं एकः जनः मृतः, अपरत्र पञ्चदशजनाश्च व्रणिताः जाताः। युक्रेन-राष्ट्रपतिः वोलोडिमिर ज़ेलेन्स्की आक्रमणस्य निन्दां कुर्वन् अवदत् यत् “मास्को-इत्यनेन युद्धस्य समाप्त्यर्थं सार्थक-वार्तालापस्य लक्षणानि अद्यापि न प्रदर्शितानीति।”

-----------------------------

<u>गुजरातवर्षा</u>

गुजरातप्रदेशे जलप्रलयसदृशवर्षायाः तीव्रता सत्यपि स्थितिः नियन्त्रणाधीना वर्तते। सौराष्ट्रप्रदेशस्य कतिपयेषु तटीयजनपदेषु-जूनागढः, गिरसोमनाथः, देवभूमिद्वारकादिषु परिस्थितिः अद्यापि गभीरा वर्तते। विगतदिनेषु अत्यधिकवृष्ट्या जूनागढ-गिरसोमनाथ-पोरबन्दर-जनपदानां अनेकेषु ग्रामीणक्षेत्रेषु तीव्रः जलाप्लावः जातः, येन सामान्यजीवनम् अवरुद्धम्, आवश्यकसेवाश्च बाधिताः अजायन्।

।। इति वार्ता ।।